संस्कारः किन्तु श्राद्धादौ पावनतासम्पादकोऽदृष्टविशेष-जनकः क्रियाभेदः इत्याकरे स्थितम्। शलाकामानं कर्णवेधनीशब्दे वक्ष्यते। अत्र कालादिप्रतिप्रसवः ज्यो०त० मार्कण्डेयवृद्धराजमार्त्तण्डकृत्यचिन्तामणिषु "यदापत्यद्वयं तिष्ठेत् सम्भवोऽप्यपरस्य च। षट्कर्णं तं विजानीयात् गर्हितश्च तयस्य च। इत्याशङ्क्य द्वयोर्मध्ये शुद्धिर्यस्याथ वत्सरे। कर्णवेधो हितस्तस्य नात्र ज्यैष्ठविचारणा। षट्कर्णोत्पत्तिमाशङ्क्य भानोः शुद्धा समेऽपि च। कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत्"

**कर्णवेधनी** स्त्री कर्णो विध्यते अनया विध–करणे ल्युट् ङीप्। कर्णवेधसाधने शलाकायां तन्मानादि: मदनरत्ने वृह०प०। "सौवर्णी राजपुत्रस्य, राजती विप्रवैश्ययोः। शूद्रस्य चायसी सूची मध्यमाष्टाङ्गुलात्मिका"। अस्य त्रिकाण्डप्रमाणतया शब्दकल्पद्रुमे हस्तिकर्णवेधन्यर्थकतोक्तिः नालीकर्णारिरितिपर्य्यायोक्तिश्च प्रामादिकी। त्रिकाण्डशेषे हि "न ना गात्रावरे नाली कर्णरोकन्तु वेधनोत्येव पाठस्यैव दर्शनात् कर्णच्छिद्रस्य वेधनीपर्य्यायतया नालीशब्दस्य गात्रावरपर्य्यायतायाश्च ततः प्रतीतेः हस्तस्यार्थकशब्दकथनप्रकरणे तत्कर्णवेधन्यस्तपर्य्यायकथनानौचित्यात्।

**कर्णवेष्ट** पु० कर्णौ वेष्ट्यते अनेन। १कुण्डले। क्रोधवशासुरांशे २द्वापरयुगीयनृपभेदे च। "गणः क्रोधवशोनाम यस्ते राजन्! प्रकीर्त्तितः। ततः सञ्जज्ञिरे वीराः क्षिताविह नराधिपाः। मद्रकः कर्णवेष्टश्च सिद्धार्थः कीचकस्तथा" भा० आ० ६७अ०। स्वार्थे क, कर्णवेष्टकोऽप्यत्र। कर्णवेष्टकाय हितम् छ यत् वा। कर्णवेष्टकीय— कर्णवेष्टक्य तद्धिते सुवर्णादौ त्रि०। भावे ल्युट्। कर्णवेष्टन कर्णभूषणे न०। करणे ल्युट्। कुण्डले अमरः। ततः ताभ्यां सम्पादि ठञ्। कार्णवेष्टकिक कार्णवेष्टनिक कर्णवष्टन(के)न शोभमाने त्रि० "कार्णवेष्टनिकं मुखम्" भट्टिः।

**कर्णव्यधविधि** पु०कर्णस्य व्यधस्य कर्णवेधस्य विधिः। सुश्रुतोक्ते कर्णवेधप्रकारभेदे स च प्रकारः सुश्रुते दर्शितो यथा "अथातः कर्णव्यधबन्धविधिमध्यायं व्याख्यास्यामः। रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते षष्ठे मासि सप्तमे वा शुक्लपक्षे प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु कृतमङ्गलस्वस्तिवाचनं धात्र्यङ्के कुमारमुपवेश्य बालक्रीडनकैः प्रलोभ्याभिसान्त्वयन् भिषग्वामहस्तेनाकृष्य कर्णौ दैवकृते छिद्रे आदित्यकरावभासिते शनैः शनैर्दक्षिणहस्तेन ऋजु विध्येत् प्रतनुकं सूच्या बहलमारया पूर्वं दक्षिणं कुमारस्य, वामं कन्यायास्ततः पिचुवर्त्तिं प्रवेशयेत् सम्यक् विद्धमामतैलेन परिषेचयेत्। शोणितबहुत्वेन वेदनया चान्यदेशविद्धमिति जानीयात् निरुपद्रवतया तद्देशविद्धमिति। तत्राज्ञेन यदृच्छया विद्धासु सिरासु कालिकामर्मरिकालोहितिकासूपद्रवा भवन्ति। तत्र कालिकायां ज्वरो दाहः श्वयथुर्वेदना च भवति। मर्मरिकायां वेदना ज्वरो ग्रन्थयश्च। लोहितिकायां मन्यास्तम्भापतानकशिरोग्रहकर्णशूलानि भवन्ति। तेषु यथास्वं प्रतिकुर्वीत। क्लिष्टजिह्माप्रशस्तसूचीव्यधाद्गाढतरवर्त्तित्वाद्दोषप्रकोपादप्रशस्तव्यधाद्वा यत्र संरम्भो वेदना वा भवति तत्र वर्त्तिमुपहृत्याशु मधुकैरण्डमूलमञ्जिष्ठायवतिलकल्कैर्मधुघृतप्रगाढैरालेपयेत्तावद्यावत् सुरूढ इति सुरूढं चैनं पुनर्विध्येत् विधानन्तु पूर्वोक्तमेव। तत्र सम्यग्विद्धमाश्ववर्त्तिं च स्थूलतरां दद्यात् परिषेकं तमेव। अथ व्यपगतदोषोपद्रवे कर्णं वर्द्धनार्थं लघुवर्द्धनकं कुर्य्यात्। भवति चात्र। एवं विवर्द्धितः कर्णश्छिद्यते तु द्विधा नृणाम्। दोषतो वाभिघाताद्वा सन्धानं तस्य मे शृणु।

तत्र समासेन पञ्चदशकर्णबन्धनाकृतयः। तद्यथा— नेमिसन्धानक उत्पलभेद्यको वल्लूरक आसङ्गिमो गण्डकर्ण आहार्य्यो निर्व्वेधिमो व्यायोजिमः कपाटसन्धिकोऽर्द्धकपाटसन्धिकः संक्षिप्तो हीनकर्णो वल्लीकर्णो यष्टिकर्णः काकौष्ठक इति। तेषु पृथुलायतसमोभयपालिर्नेमिसन्धानकः। वृत्तायतसमोभयपालिरुत्पलभेद्यकः। ह्रस्ववृत्तसमोभयपालिर्वल्लूरकः। अभ्यन्तरदीर्घैकपालिरासङ्गिमः। बाह्यदीर्घैकपालिर्गण्डकर्णः। अपालिरुभयतोऽप्याहार्य्यः। पीठोपमपालिरुभयतः क्षीणपुत्रिकाश्रितो निर्व्वेधिमः। स्थूलाणुसमविषमपालिर्व्यायोजिमः। अभ्यन्तरदीर्घैकपालिरितराल्पपालिः कपाटसन्धिकः। बाह्यदीर्घैकपालिरितराल्पपालिरर्द्धकपाटसन्धिकः। तत्र दशैते कर्णबन्धविकल्पाः साध्यास्तेषां स्वनामभिरेवाकृतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पञ्चासाध्यास्तत्र शुष्कशष्कुलिरुत्सन्नपालिरितराल्पपालिः संक्षिप्तः। अनधिष्ठानपालिः पर्य्यन्तयोः क्षीणमांसो हीनकर्णः। तनुविषमाल्पपालिर्व्वल्लीकर्णः, ग्रथितमांसस्तब्धसिराततः सूक्ष्मपालिर्यष्टिकर्णः। निर्मांससंक्षिप्ताग्राल्पशोणितपालिः काकौष्ठकपालिरिति। बद्धेष्वपि तु शोथदाहरागपाकपिड-